# Shri Khandaraja Stotram

# શ્રીખણ્ડરાજસ્તોત્રમ્

## Document Information

Text title : Shri Khandaraja Stotram

File name : khaNDarAjastotram.itx

Category : shiva, vAsudevAnanda-sarasvatI

Location : doc_shiva

Author : vAsudevAnandasarasvatI TembesvAmi

Description-comments : From stotrAdisangraha

Latest update : May 12, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 12, 2021

*sanskritdocuments.org*

# શ્રીખણ્ડરાજસ્તોત્રમ્

શ્રીશઙ્કરાવતારોઽયં ખણ્ડરાજો મહામતિઃ ।
તસ્મૈ મહાલસેશાય મણિમલ્લારયે નમઃ ॥ ૧॥

ઋષીણાં યસ્તપઃસિદ્ધ્યા અવતીર્ય મહીતલે ।
દૈત્યાનનાશયત્તસ્મૈ મણિમલ્લારયે નમઃ ॥ ૨॥

યો વેદમયમાસ્થાય મહાશ્વમપરાજિતમ્ ।
જઘ્ને દૈત્યરિપૂન્તસ્મૈ મણિમલ્લારયે નમઃ ॥ ૩॥

પીતવસ્ત્રપરીધાનઃ પીતાભરણભૂષિતઃ ।
ત્રૈલોક્યવન્દિતસ્તસ્મૈ મણિમલ્લારયે નમઃ ॥ ૪॥

માર્ગશીર્ષે મહામાસે પ્રત્યબ્દં યન્મહોત્સવઃ ।
યોઽભીષ્ટદો વિભુસ્તસ્મૈ મણિમલ્લારયે નમઃ ॥ ૫॥

દેવઃ પ્રતાપમાર્તણ્ડભૈરવઃ શત્રુકૃન્તનઃ ।
સર્વાપત્તિહરસ્તસ્મૈ મણિમલ્લારયે નમઃ ॥ ૬॥

ખણ્ડરાજ પ્રસીદ ત્વં સર્વાપત્તિમપાકુરુ ।
પાહિ માં ત્વં પ્રભો તુભ્યં મણિમલ્લારયે નમઃ ॥ ૭॥

કાયેન મનસા વાચા યેઽપરાધા મયા કૃતાઃ ।
તાન્ક્ષમસ્વ પ્રભો તુભ્યં મણિમલ્લારયે નમઃ ॥ ૮॥

ખણ્ડરાજસ્તુતિમિમાં ત્રિસન્ધ્યં યઃ પઠેદ્દ્વિજઃ ।
સર્વાન્કામાન્સ આપ્ત્વેહ શિવલોકે મહીયતે ॥ ૯॥

ઇતિ શ્રીવાસુદેવાનન્દસરસ્વતીવિરચિતં શ્રીખણ્ડરાજસ્તોત્રં સમ્પૂર્ણમ્ ।

*Shri Khandaraja Stotram*

pdf was typeset on May 12, 2021

Please send corrections to *sanskrit@cheerful.com*